# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (३१)

## ०९.०१.२०१२

- षकारान्तः पुंलिङ्गः ‘चिकीर्ष्’ शब्दः ।
- ‘डुकृञ् करणे’
- कर्तुम् इच्छति इत्यर्थे,
- कृ (सन्) स (‘धातोः कर्मणः ...’ - ३.१.७)
- कॄ स (‘अज्झनगमां सनि’ - ६.४.१६ - इति दीर्घः)
- किर् स (‘ऋत इद्धातोः’ - ७.१.१००, ‘उरण् रपरः’ - १.१.५१)
- कीर् स (‘हलि च’ - ७.२.८७ - इति उपधादीर्घः)
- कीर् कीर् स (‘सन्यङोः’ - ६.१.९ - इति द्वित्वम्)
- की कीर् स (‘हलादिः शेषः’ - ७.४.६० - इति रेफलोपः)

- कि कीर्   स (‘ह्रस्वः’ - ७.४.५९ - इति अभ्यासस्य ह्रस्वः)
- चि कीर्   स   (‘कुहोश्चुः’ - ७.४.६२ - इति चुत्वम्)
- चिकीर्ष      (‘आदेशप्रत्यययोः’ - ८.३.५९ - इति षत्वम्)
- चिकीर्ष      (‘सनाद्यन्ता धातवः’ - ३.१.३२ - इति धातुत्वम्)
- चिकीर्ष (क्विप्) व्   (‘क्विप् च’ - ३.२.७६ - इति क्विप्)
- चिकीर्ष्   व्  (‘अतो लोपः’ - ६.४.४८ - इति अकारलोपः)
- चिकीर्ष्      (‘वेरपृक्तस्य’ - ६.१.६७)
- चिकीर्ष्      (‘कृत्तद्धितसमासाश्च’ - १.२.४६ - इति प्रातिपदिकत्वम्)

- ‘रात्सस्य’ इति सलोपे विसर्गः ।

- चिकीर्ष् (सुँ) स्
- चिकीर्ष् (‘हल्ङ्याब्भ्यः…’ - ६.१.६८ - इति सुलोपः)
- चिकीर् (‘रात्सस्य’ - ८.२.२४ - इति सलोपः)
- चिकीः (‘खरवसानयोर्विसर्जनीयः’ - ८.३.१५)
- चिकीर्षौ, चिकीर्षः ।
- चिकीर्षा, चिकीर्भ्याम्, चिकीर्भिः इत्यादि ।

- ‘रोः सुपि’ इति नियमात् न विसर्गः ।
- चिकीर्ष्   सु
- चिकीर्    सु  (‘रात्सस्य’ - ८.२.२४ - इति सलोपः)
  - ‘खरवसानयोर्विसर्जनीयः’ - इति प्राप्ते, ‘रोः सुपि’ इति नियमात् विसर्गो न ।
- चिकीर्षु       (‘आदेशप्रत्यययोः’ - ८.३.५९ - इति षत्वम्)

- षकारान्तः पुंलिङ्गः ‘दोष्’ शब्दः ।
- दमु उपशमे ।
- ‘दमेर्डोस्’ ।
- दम् (डोस्) ओस्
  - डित्त्वसामर्थ्यात् टिलोपः ।
- द् ओस् (‘टेः’ - ६.४.१४३)
- दोष् (‘आदेशप्रत्यययोः’ - ८.३.५९ - इति षत्वम्)

- दोष् (सुँ) स्
- दोष्          (‘हल्ङ्याब्भ्यः..’ - ६.१.६८)
  - षत्वस्य असिद्धत्वाद् रुत्व-विसर्गौ ।
- दोर्          (‘ससजुषो रुः’ - ८.२.६६)
- दोः          (‘खरवसानयोर्विसर्जनीयः’ - ८.३.१५)
- दोषौ, दोषः ।

- दोष्  (शस्) अस्
  - ‘पद्दन्नोमास्..’ इति वा दोषन् ।
- दोषन्  अस्  (‘पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्...’ - ६.१.६३)
- दोष् न्  अस् (‘अल्लोपोऽनः’ - ६.४.१३४)
- दोष्णस्       (‘रषाभ्यां नो णः समानपदे’ - ८.४.१)
- दोष्णः        (रुत्व-विसर्गौ)
- आदेशाभावे,
- दोषः
- दोष्णा/दोषा
- दोःषु/दोष्षु

- विश प्रवेशने ।
- सन्नन्तात् क्विप् ।
- विश्   स  (‘धातोः कर्मणः...’ - ३.१.७)
- विश् विश्  स  (‘सन्यङोः’ - ६.१.९)
- वि विश्  स  (‘हलादिः शेषः’ - ७.४.६०)
- विविष्   स  (‘व्रश्चभ्रस्ज...’ - ८.२.३६)
- विविक्   स   (‘षढोः कः सि’ - ८.२.४१)
- विविक्ष   (‘आदेशप्रत्यययोः’ - ८.३.५९)
- क्विपि कृते अकारलोपे ‘विविक्ष्’ इति प्रातिपदिकम् ।

- विविक्ष् (सुँ) स्
- विविक्ष् ('हल्ङ्यब्भ्यः...' - ६.१.६८)
  - 'स्कोः संयोगाद्योरन्ते च' - ८.२.२९ इति कलोपे प्राप्ते, कत्वस्य असिद्धत्वात् संयोगान्तलोपः ।
- विविश् ('संयोगान्तस्य लोपः' - ८.२.२३)
  - सकारस्य लोपे 'निमित्ताभावे नैमित्तिकस्याप्यपायः' इति षत्वमपि निवर्तते ।
  - पुनः पदान्तत्वं निमित्तीकृत्य 'व्रश्च..' इति षः ।
- विविष् ('व्रश्चभ्रस्ज...' - ८.२.३६)
  - जश्त्वचर्त्वे ।
- विविट् / विविड्

- विविक्षौ, विविक्षः ।
- विविक्षा, विविड्भ्याम् इत्यादि ।

- षकारान्तः पुंलिङ्गः ‘तक्ष्’ शब्दः ।
- ‘तक्षू तनूकरणे’ इत्यस्मात् क्विप् ।

- तक्ष्   (सुँ) स्
- तक्ष्   ('हल्ङ्याब्भ्यो...' - ६.१.६८)
  - 'स्कोः संयोगाद्योरन्ते च' - ८.२.२९ - इति कलोपः
- तष्   ('स्कोः..' - ८.२.२९)
- तड्   ('झलां जशोऽन्ते' - ८.२.३९)
- तट्   ('वाऽवसाने' - ८.४.५६)
- तक्षौ, तक्षः ।

- षकारान्तः पुंलिङ्गः ‘गोरक्ष्’ शब्दः ।
- गोरट्/गोरड्, गोरक्षौ, गोरक्षः ।
- तक्षिरक्षिभ्यां ण्यन्ताभ्यां क्विपि तु ‘स्कोः...’ इति न प्रवर्तते, णिलोपस्य स्थानिवद्भावात् ।
- तक्षि (क्विप्) व्
- तक्ष् व् (‘णेरनिटि’ - ६.४.५१ - इति णिलोपः)
- तक्ष् (‘वेरपृक्तस्य’ - ६.१.६७)
- ‘पूर्वत्रासिद्धे न स्थानिवत्’ इति तु इह नास्ति, ‘तस्य दोषः संयोगादिलोपलत्वणत्वेषु’ (वा) इति निषेधात् ।

- तक्/तग् ।
- गोरक्/गोरग् ।

- पक्तुम् इच्छति इत्यर्थे ‘डुपचष् पाके’ धातोः सन् ।
- ‘पिपच् स’ इति स्थिते ‘चोः कुः’ (८.२.३०) इति कुत्वम् ।
- ‘स्कोः..’ (८.२.२९) इति कलोपं प्रति कुत्वस्य असिद्धत्वात् संयोगान्तलोपः।
- पिपक्/पिपग् ।
- एवं विवक्, दिधक् ।

# सकारान्ताः पुंलिङ्गाः

- ‘पिस गतौ’ । सुष्ठु पेसतीति सुपीः ।
- सुपिस्  (सुँ) स्
- सुपिस्  (‘हल्ङ्याब्भ्यः...’ - ६.१.६८)
- सुपिर्  (‘ससजुषो रुः’ - ८.२.६६)
- सुपीर्  (‘र्वोरुपधाया दीर्घ इकः’ - ८.२.७६)
- सुपीः  (‘खरवसानयोर्विसर्जनीयः’ - ८.३.१५)
- सुपिसौ, सुपिसः ।
- सुपिसा, सुपीर्भ्याम् ।
- सुपीःषु/सुपीष्षु ।
- एवं सुतूः । ‘तुस खण्डने’ ।

- सकारान्तः पुंलिङ्गः ‘विद्वस्’ शब्दः ।
- ‘विद ज्ञाने’ इति धातोः लटः शतुः वसुप्रत्ययः ।
- विद्वस्  स्
- विद्वन् स्  स्  (‘उगिदचां सर्वनामस्थानेऽधातोः’ - ७.१.७०)
- विद्वान् स्  स्  (‘सान्तमहतः संयोगस्य’ - ६.४.१० - इति दीर्घः)
- विद्वान्  स्  (‘हल्ङ्याब्भ्यः...’ - ६.१.६८)
- विद्वान्  (‘संयोगान्तस्य लोपः’ - ८.२.२३)

- विद्वस्   औ
- विद्वन् स्  औ   (‘उगिदचां सर्वनामस्थानेऽधातोः’ - ७.१.७०)
- विद्वान् स्  औ  (‘सान्तमहतः संयोगस्य’ - ६.४.१० - इति दीर्घः)
- विद्वांसौ     (‘नश्चापदान्तस्य झलि’ - ८.३.२४)

- विद्वांसः ।
- हे विद्वन् ।
- विद्वांसम्, विद्वांसौ ।

# ४३५. वसोः सम्प्रसारणम् (६.४.१३१)

- पदद्वयम् ।
- ‘अङ्गस्य’ (६.४.१) इति, ‘भस्य’ (६.४.१२९) इति च अधिक्रियते ।
- वस्वन्तस्य भस्य सम्प्रसारणं स्यात् ।
- पूर्वरूपम्, षत्वम् ।
- विद्वस् (शस्) अस्
- विद् उ अस् अस् (‘वसोः सम्प्रसारणम्’ - ६.४.१३१)
- विदुस् अस् (‘सम्प्रसारणाच्च’ - ६.१.१०८ - इति पूर्वरूपम्)
- विदुषस् (‘आदेशप्रत्यययोः’ - ८.३.१५)
- विदुषः (‘रुत्व-विसर्गौ’)

- विदुषा ।
- ‘वसुस्रंसुध्वंस्वनडुहां दः’ (८.२.७२) इति दत्वम् ।
- विद्वद्भ्याम् इत्यादि ।